स्नाने पराभवो न भवति तादृशी नदी।) नदीविशेषः। इति मेदिनी॥

अधैर्य्यं, त्रि, (नास्ति धैर्य्यं यस्य सः।) धारताशून्यः। धैर्य्याभावे क्ली। यथा,—

"धैर्य्याधैर्य्यपरिग्रहग्रहिलयोरेकोदृशोः प्रीतये"।

इति भानुभट्टः॥

अधोऽंशुकं, क्ली, (अधः नीचदेशस्थम् अंशुकं वस्त्रं, कर्म्मधारयः।) परिधानवस्त्रं। इत्यमरः॥

अधोघण्टा, स्त्री, (अधः अधोदेशादारभ्य घण्टेव फलं यस्याः सा।) अपामार्गः। इति रत्नमाला॥

अधोजिह्विका, स्त्री, (अल्पा जिह्वा कन् स्त्रियां टाप्, अधः अधरा जिह्विका कर्म्मधारयः।) तालुमूलस्थक्षुद्रजिह्वा। इति हारावली॥ आल्जिव इति भाषा।

अधोभुवनं, क्ली, (अधः नीचदेशस्थं भुवनं लोकः कर्म्मधारयः।) पातालं। इत्यमरः॥

अधोमर्म्म, [न्] क्ली, (अधः अधरं मर्म छिद्रं।) गुह्यद्वारं। इति हेमचन्द्रः॥

अधोमुखः, त्रि, (अधोमुखं यस्य सः।) अधोवदनः। पातालमुखः। तत्पर्य्यायः। अवाङ्मुखः २। इत्यमरः॥ अवाचीनः ३। इति जटाधरः॥ अधोमुखनक्षत्रगणो यथा,—

"अश्लेषवह्नियमपित्र्यविशाखयुक्तं
पूर्व्वत्रयं शतभिषा च नवाप्युडूनि।
एतान्यधोमुखगणानि शुभानि नित्यं
विद्यार्थ्यभूमिखननेषु च शोभितानि"।

इति ज्योतिःसारसंग्रहः।

अधोमुखा, स्त्री, (अधोमुखं यस्याः सा, स्त्रियां टाप्।) गोजिह्वावृक्षः। इति राजनिर्घण्टः॥

अधोवायुः, पुं, (अधः अधरः वायुः कर्म्मधारयः।) अपानवायुः। यथा,—

"क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत्"।

इति तन्त्रसारे योगिनीहृदयं॥

अधोक्षजः, पुं, (अधः खाट्वाभावात् हीनम् अक्षजं प्रत्यक्षज्ञानं यस्य सः। अक्षात् इन्द्रियात् जायते अक्ष+जन् ड, पञ्चमीतत्।) विष्णुः। इत्यमरः॥ (यथा महाभारते। अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः।)

अध्यग्नि, क्ली, (अग्नेः समीपे अव्ययीभावः।) विवाहकाले अग्निसमीपे स्त्रियै दत्तं धनादि। यथा,—

"विवाहकाले यत् स्त्रीभ्यो दीयते ह्यग्निसन्निधौ।
तदध्यग्निकृतं सद्भिः स्त्रीधनन्तु प्रकीर्त्तितं"॥

इति दायभागे कात्यायनः॥

अध्यण्डा, स्त्री, (अधिकमण्डं वीजं यस्याः सा, स्त्रियां टाप्) कपिकच्छुः। इत्यमरः॥ आल्कुशी इति भाषा। भूम्यामलकी। इति रत्नमाला॥

अध्ययनं, क्ली, (अधि+इङ्+भावे ल्युट्।) गुरुमुखादानुपूर्व्वीश्रवणं। पठनं। ब्राह्मणस्य षट्कर्म्मान्तर्गतमिदं। इति शब्दरत्नावली॥

अध्यवसायः, पुं, (अधि+अव+सो+भावे घञ्।) उत्साहः। इत्यमरः॥ कर्म्मणि सुकरः प्रत्ययः। इति मधुः॥ कर्म्मणि दृढ़यत्नकारको भावः। इति रमानाथः॥ कर्म्मसु प्रत्ययः इति नयनानन्दः॥ अशक्ये बलोद्यमः। इति केचित्॥ उद्योगोद्यमौ चात्र। इति भरतः॥

अध्यशनं, क्ली, (अधिकमशनं भोजनं कर्म्मधारयः।) अजीर्णे भोजनं। यथा। अजीर्णे भुज्यते यत्तु तदध्यशनमुच्यते। इति भावप्रकाशः॥

अध्यक्षः, पुं, (अध्यक्ष्णोति समन्तात् व्याप्नोति अधि+अक्ष्+अच्।) (कृष्यधारणादि व्यवहारेष्वधिकृतः। व्यापकः।) क्षीरिकावृक्षः। इति शब्दरत्नावली॥

अध्यक्षः, त्रि, (अक्षमिन्द्रियमधिगतः प्रादिसमासः।) प्रत्यक्षः। इन्द्रियजन्यज्ञानं।

(यदध्यक्षेण जगतां वयमारोपितास्त्वया॥

इति कुमारसम्भवे।) अधिकृतः।

आयव्ययादिनिरीक्षकः। इत्यमरः॥

अध्यापकः, त्रि, (अधि+इङ्+णिच्+ण्वुल्।) अध्यापनकर्त्ता। पाठगुरुः। अध्यापयिता। तत्पर्य्यायः। उपाध्यायः २। इत्यमरः॥

अध्यापनं, क्ली, (अधि+इङ्+णिच्+भावे ल्युट्।) पाठनं। विद्यादानं। ब्राह्मणानां षट्कर्म्मान्तर्गतकर्म्मेदं। इति शब्दरत्नावली॥ (यथा मनुः,—

"अध्यापनमध्ययनं यजनं याजनं तथा।
दानं प्रतिग्रहश्चैव षटकर्म्माण्यग्रजन्मनः"॥)

अध्यायः, पुं, (अधि+इङ्+भावे घञ् अध्ययनम्।) वेदपुराणादिपरिच्छेदः। ग्रन्थसन्धिः। तन्नामान्तराणि यथा। सर्गः। वर्गः। परिच्छेदः। उद्घातः। अङ्कः। संग्रहः। उच्छ्वासः। परिवर्त्तः। पटलः। काण्डं। स्थानं। प्रकरणं। पर्व्व। आह्निकं। इति त्रिकाण्डशेषः॥ स्कन्धः। स्तवकः। उल्लासः। पादः। उद्योतः। विरचनं। इत्याद्यपि॥ यदुक्तम्।

("सर्गोवर्गपरिच्छेदोद्घाताध्यायाङ्कसंग्रहाः।
उच्छ्वासः परिवर्त्तश्च पटलः काण्डमेव च॥
स्थानं प्रकरणं चैव पर्व्वोल्लासाह्निकानि च।
पुराणादौ परिच्छेदा अनेके परिकीर्त्तिताः॥")

अध्यारूढ़ः, त्रि, (अधि+आङ्+रुह्+क्तः।) समारूढ़ः। कृतारोहणः। अभ्यधिकः। अतिशयः। इति मेदिनी॥

अध्यारोपः, पुं, (अधि+आ+रुह्+णिच्भावे अच्।) वस्तुन्यवस्त्वारोपः। सच्चिदानन्दानन्ताद्वयब्रह्मणि अज्ञानादिसकलजड़समूहस्यारोपणमित्यर्थः। असर्पभूतरज्जौ सर्पारोपवत्। इति वेदान्तसारः॥

अध्यावाहनिकं, क्ली, (अध्यावाहनं पितृगृहात् स्वामिगृहागमनं तत्काले लब्धं अध्यावाहन+लब्धार्थे ठन् तस्य इकः। अधि+आ+वह्+णिच् ल्युट्।) स्त्रीधनविशेषः। यथा,—

"यत् पुनर्लभते नारी नीयमाना हि पैतृकात्।
अध्यावाहनिकं नाम तत् स्त्रीधनमुदाहृतं॥"

इति दायभागे कात्यायनः॥

अध्याहरणं, क्ली, (अधि+आ+हृ+भावे ल्युट्।) अध्याहारः। तर्कणं। ऊहनं। इति शब्दरत्नावली॥

अध्याहारः, पुं, (अधि+आ+हृ+भावे घञ्।) तर्कः। ऊहः। इत्यमरः॥ अस्पष्टार्थस्य शब्दान्तरेण स्पष्टीकरणं। आकाङ्क्षासमापकपदानुसन्धानं। वाक्यसम्पूर्णार्थपदयोजनं। युक्तिप्राप्तस्य पदान्तरमुदाहृत्य व्यक्तीकरणं। इति तट्टीका॥

अध्युष्टः, त्रि, (अधि+वस्+क्तः, आगमशास्त्रविधेरनित्यात् इड़ागमाभावः। कृत्तद्धितसमासाश्च अभिधाननियामका इति प्रसिद्धेः।) सार्द्धत्रिसङ्ख्या। ३॥ साड़े तिन इति भाषा। यथा,—

अवाप्य स्वां भूमिं भुजगनिभमध्युष्ठवलयं।

इति आनन्दलहरी॥

अध्युष्ट्रः, पुं, (उष्ट्रमधिगतः प्रादिसमासः।) उष्ट्रयुक्तरथः। उष्ट्रवाह्यप्रेङ्खा। इति हारावली॥

अध्यूढ़ः, पुं, (अधि+वह्+क्तः।) महेश्वरः। इति मेदिनी॥ (अधिरोपितः। समृद्धः। अभ्युदयशाली।)

अध्यूढ़ः, त्रि, (आधिक्येन वृद्धिं गतः अधि+वह+क्तः।) अधिकवृद्धियुक्तः। समृद्धः। इति धरणी॥

अध्यूढ़ा, स्त्री, (अधि+वह+कर्म्मणि क्तः, स्त्रियां टाप्।) प्रथमविवाहिता स्त्री, कृतसापत्निका। कृतानेकविवाहस्य प्रथमोढा स्त्री। इत्यमरमेदिनीकरौ॥

अध्येषणा, स्त्री, (अधि+इष्+णिच्+भावे युच, स्त्रियां टाप्।) याच्ञा। इति हेमचन्द्रः॥ आराध्यस्यादरपूर्व्वकं कर्म्मणि नियुक्तकरणं। गुर्व्वादेः सत्कारपूर्व्वकं क्वचिदर्थे नियोजनं। तत्पर्य्यायः। सनिः २। इत्यमरः॥ सनी ३। इति तट्टीका॥

अध्वगः, पुं, (अध्वना पथा गच्छति अध्वन्+गम्+डः, उपपदसमासः।) पथिकः। इत्यमरः॥ उष्ट्रः। इति त्रिकाण्डशेषः॥ सूर्य्यः। इति हेमचन्द्रः॥ खेसरः। इति राजनिर्घण्टः॥ खचर इति भाषा।

अध्वगभोग्यः, पुं, (अध्वगेन पथिकेन भोग्यः, अनायासलभ्यफलत्वात्, तृतीयातत्पुरुषः।) आम्रातकवृक्षः। इति त्रिकाण्डशेषः॥

अध्वगा, स्त्री, (अध्वन्+गम्+डः, उपपदसमासः। स्त्रियां टाप्।) गङ्गा। इति त्रिकाण्डशेषः॥

अध्वजा, स्त्री, (अध्वनि जायते अध्वन्+जन्+डः, उपपदसमासः, स्त्रियां टाप्।) स्वर्णुलीवृक्षः। इति राजनिर्घण्टः॥

अध्वनीनः, त्रि, (अध्वनि साधुः अध्वन्+ख तस्य ईनः।) पथिकः। इत्यमरः॥

अध्वन्यः, त्रि, (अध्वनि साधुः अध्वन्+यत्।) पथिकः। इत्यमरः॥ (अध्वन्येन विमुक्तकण्ठमखिलां रात्रिं तथा क्रन्दितं॥ इति अमरुशतकं॥)

अध्वरः, पुं, (अध्वानं सन्मार्गं राति ददाति अध्वन्+रा+कः उपपदसमासः।) यज्ञः। वसुभेदः। सावधानः। इति मेदिनी॥ ("तमध्वरे विश्वजिति क्षितीशं"। इति रघुवंशे।)

अध्वरथः, पुं, (अध्वैव रथो गमनसाधनं यस्य सः।) पथरथः। अध्वगमनोपयुक्तरथः। तत्पर्य्यायः। परियानिकः २। इति हेमचन्द्रः॥